# संस्कृतम् (केन्द्रिकम्, कोड-सङ्ख्या - 322)
## आदर्श-प्रश्नपत्रम् *
## कक्षा - द्वादशी (2026-27)

**समयः - होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्यनिर्देशाः -**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रमुखाः प्रश्नाः सन्ति।
- अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति -

| | |
|---|---|
| **खण्डः (क) अपठितावबोधनम्** | - 10 अङ्काः |
| **खण्डः (ख) रचनात्मककार्यम्** | - 15 अङ्काः |
| **खण्डः (ग) अनुप्रयुक्तव्याकरणम्** | - 20 अङ्काः |
| **खण्डः (घ) I. पठितावबोधनम्** | - 25 अङ्काः |
| **II. संस्कृत-साहित्येतिहास-परिचयः** | - 10 अङ्काः |

- प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
- उत्तरलेखनात् पूर्वं प्रश्नपत्रानुसारं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रम् एव पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

## खण्डः - क
## अपठितावबोधनम् - 10 अङ्काः

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत - 10**

अस्माकं देशः प्राचीनकालादेव प्राकृतिक-पर्यावरणस्य पोषकः। वैदिककाले यद्यपि पर्यावरणस्य प्रदूषणस्य समस्या नासीत् तथापि वेदेषु स्थाने-स्थाने ऋषीणां पर्यावरणविषयकं चिन्तनं दृश्यते। अद्य पर्यावरण-प्रदूषणं संसारस्य भीषणतमा समस्या वर्तते, परं जनाः अस्याः गाम्भीर्यं न अनुभवन्ति। पर्यावरणं रक्षणीयं वृक्षाः रोपणीयाः रक्षणीयाः च इति श्रृण्वन्तः उद्घोषयन्तः अपि वयं प्रतिदिनं तेषां कर्तनं पश्यामः। 'प्लास्टिक्' इति रसायनेन निर्मितवस्तूनि पर्यावरणाय हानिकराणि इति जानन्तः अपि जनाः एतेषां प्रयोगं बाहुल्येन कुर्वन्ति। पर्यावरणप्रदूषकं धूमं क्षिपतां वाहनानाम् औद्योगिक-यन्त्रागाराणां सङ्ख्या निरन्तरं वर्धमाना अस्ति। यद्यपि विकासाय नवीनाः आविष्काराः, अपेक्षिताः परं सञ्चाराय विस्तृताः सुरक्षिताः मार्गाः जनानां कृते अपि आवश्यकाः एव। यदि पर्यावरणं प्राणिजीवनाय

*अवधेयम् - 2026-27 इति शैक्षणिकसत्रे प्रश्नपत्रस्य प्रारूपे मूल्याङ्कनपद्धतौ च किमपि परिवर्तनं नास्ति।

| | | |
|---|---|---|
| | अनुकूलं न भविष्यति तर्हि पृथिव्यां जीवनमेव असम्भवं भविष्यति तदा भौतिकनिकासेन किम्। अतः सर्वकारः जनसहयोगेन सर्वथा पर्यावरणरक्षणाय यत्नशीलः भवेदिति। | |
| | (अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×1=2 |
| | (i) के रोपणीयाः रक्षणीयाः च?<br>(ii) कदा पर्यावरणस्य प्रदूषणस्य समस्या नासीत्?<br>(iii) अस्माकं देशः कस्य पोषकः? | |
| | (आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×2=4 |
| | (i) किं जानन्तः जनाः 'प्लास्टिक्'-निर्मितवस्तूनां प्रयोगं बाहुल्येन कुर्वन्ति?<br>(ii) यदि पर्यावरणं प्राणिजीवनाय अनुकूलं न भविष्यति तर्हि किं भविष्यति?<br>(iii) केषां सङ्ख्या निरन्तरं वर्धमाना अस्ति? | |
| | (इ) अनुच्छेदस्य समुचितं शीर्षकं लिखत। | 1×1=1 |
| | (ई) यथानिर्देशम् उत्तरत - | 3×1=3 |
| | (i) 'नवीनाः' इति विशेषणपदस्य विशेष्यपदं किम्?<br>(क) जनाः (ख) आविष्काराः<br>(ग) मार्गाः (घ) अपेक्षिताः<br>(ii) 'शोषकः' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?<br>(क) विषयः (ख) चिन्तनीयः<br>(ग) सरलः (घ) पोषकः<br>(iii) जनाः अस्याः गाम्भीर्यं न अनुभवन्ति।' अत्र किं क्रियापदम्?<br>(क) अत्र (ख) अस्याः<br>(ग) अनुभवन्ति (घ) जनाः | |
| | **खण्डः - ख**<br>**रचनात्मककार्यम् - 15 अङ्काः** | |
| 2. | भवान् प्रदीपः। स्वस्य कुशलतायाः विषये सूचयितुं मातरं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयित्वा पुनः लिखतु - | 10×½=5 |
| | (i) ..................<br>शिमलातः,<br>तिथिः ..................<br><br>परमपूज्यमातः!<br>सादरं प्रणामाः। | |

| | | |
|---|---|---|
| | अहम् अत्र कुशली तत्रापि कामये। भवत्याः पत्रं प्राप्य मनसि सन्तोषः (ii) ............ । मम भ्राता (iii) ............ स्वस्थः इति हर्षस्य विषयः। सः मम अध्ययनस्य (iv) .................. च विषये चिन्तितः आसीत्। अहं पञ्चवादने (v) ............ यथानिर्दिष्टं (vi)............ करोमि (vii)........... च पठामि। नववादने विद्यालयं (viii) ............ । चतुर्वादने (ix) ............ आगच्छामि। सप्तवादने गृहकार्यं करोमि। पितृमहाभागानां प्रणामाः कथनीयाः।<br>भवत्याः आज्ञापालकः (x) ............<br>प्रदीपः।<br>**मञ्जूषा**<br>पुत्रः, विद्यालयात्, व्यायामम्, स्वास्थ्यस्य, जातः, व्यास-छात्रावासः, इदानीम्, तदनन्तरम्, उत्थाय, गच्छामि। | |
| 3. अ | अधः प्रदत्तं चित्रम् आधृत्य पञ्चविंशतितः त्रिंशत्परिमितैः शब्दैः अनुच्छेदमेकं लिखत - | 5 |
| | <br>**मञ्जूषा**<br>अकरोत्, महाभारतकाले, अर्जुनः, युद्धम्, प्राप्नोत्, गीतोपदेशः, रथात्, प्रार्थना, श्रीकृष्णः, निराकरोति, ज्ञानप्रवाहः, मोहभग्नम्, विषादम्।<br>**अथवा** | |
| आ | अधः प्रदत्तं विषयम् आधृत्य पञ्चविंशतितः त्रिंशच्छब्दपरिमितैः अनुच्छेदमेकं लिखत - | |
| | **विषयः - 'देशभक्तः'**<br>**मञ्जूषा**<br>संस्कृतिम्, प्रति, मन्यते, नित्यम्, देशभक्तः, परित्यज्य, पुरुषः, हृदयम्, स्वदेशम्, अखण्डप्रेम्णा, स्वजन्मभूमेः, स्वार्थम्, राष्ट्रहितम्, सङ्कटकाले, देशरक्षणे, समाजे। | |

| 4. अ | मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत - | 10×½=5 |
|---|---|---|
| | कस्मिंश्चिद् विशाले जनप्रदेशे कश्चन धनादि-ऐश्वर्य-विहीनः (i) ............ जनः प्रतिवसति स्म। सः भिक्षाटनेन (ii) ......... करोति स्म। अथ कदाचित् सः पिष्टेन पूरितम् एकं (iii) ............ प्राप्नोत्। सः तं घटम् आनीय गृहे एकस्मिन् नागदन्ते स्थापितवान्। सः सदा तस्य घटस्य अधः उपविश्य घटमेव पश्यति स्म। एकदा रात्रौ सः (iv) ............ -"यदि प्रदेशे दुर्भिक्षः भवेत् तर्हि एतस्य अधिकं मूल्यं भवेत्। तदा अहम् एतस्य पिष्टपूरितस्य घटस्य (v) ............ कृत्वा तेन धनेन अजानां क्रयणं करिष्यामि। कालान्तरे तेन अजसमूहः भविष्यति। अजसमूहस्य विक्रयणं कृत्वा महिषीः ताः च विक्रीय अश्वान् क्रेष्यामि। अश्वान् अपि विक्रीय यथेष्टं (vi) ............ सम्पादयिष्यामि। तेन धनेन बृहतः भवनस्य निर्माणं कारयिष्यामि। तदा मां धनवन्तं ज्ञात्वा कश्चित् श्रेष्ठी आगत्य रूपवतीं (vii) ......... मह्यं दास्यति। अनन्तरं मम पुत्रः भविष्यति। देवः इति तस्य नामकरणं करिष्यामि। अथ कदाचन अहं प्राङ्गणे उपविश्य (viii) ............ पठिष्यामि। यदा देवः जानुभ्यां चलन् मम (ix) ................. आगमिष्यति तदा तं बालं नेतुं स्वपत्नीम् आज्ञापयिष्यामि। यदि सा मम वचनं न श्रोष्यति, तर्हि अहं कोपेन (x) ............ करिष्यामि।" इति चिन्तयन् सः पादप्रहारं कृतवान् एव। तेन प्रहारेण घटः पतितः भग्नः चाभवत्।<br><br>**मञ्जूषा**<br>चिन्तितवान्, पादप्रहारम्, पुस्तकम्, दरिद्रः, मृत्तिकाघटम्, जीवनयापनम्, विक्रयणम्, धनम्, समीपम्, स्वकन्याम्।<br><br>**अथवा** | |
| आ | अधोलिखिते संवादे मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयत - | |
| | **महेशः** - मित्र! भवान् वार्षिकोत्सवाय विद्यालयं न आगच्छत्। अपि गृहे सर्वं कुशलम्?<br>**राममनोहरः** - (i) ________________________________________।<br>**महेशः** - तर्हि किमर्थं नागच्छत्?<br>**राममनोहरः** - (ii) ________________________________________।<br>**माधवः** - अहो! उज्जयिनीं सर्वे परिवारजनाः अगच्छन्। बहूत्तमम्। किं किं दृष्टम्?<br>**राममनोहरः** - (iii)________________________________________।<br>**माधवः** - उज्जयिन्याः विषये बहुधा श्रुतम् अस्ति। किम् अन्वभवत् तत्र भवान्?<br>**राममनोहरः** - आनन्दप्रदं नगरं तत्, सर्वेऽपि तत्र चिन्तारहिताः भक्ताः 'हरहरमहादेव जयमहाकाल' इति वदन्तः सर्वत्र व्रजन्ति।<br>**माधवः** - अहो! अद्भुतं खलु तद् दृश्यम्। किं प्रातःकालस्य भस्मारत्या दृश्यम् अवालोकयत्?<br>**राममनोहरः** - (iv) ________________________________________।<br>**माधवः** - सत्यं वदति, अहम् अत्र विवरणं श्रुत्वैव आनन्दितः भवामि।<br>**राममनोहरः** - भवान् अपि कदापि गच्छतु यतोहि वस्तुतः दर्शनीयं स्थलं तत्।<br>**माधवः** - (v) ________________________________________। | |

<table>
<tr><td></td><td>राममनोहरः - स्वागतम्, पुनर्मिलामः महादेव!<br>मञ्जूषा<br>● आम्, अद्भुतं दृश्यं भवति तत्र यदा भस्मारती भवति तदा जनाः मन्दिरपरिसरे उपविश्य आनन्दरताः भवन्ति।<br>● आम् मित्र! परिवारसदस्यैः सह विमर्शं कृत्वा योजनां करिष्यामि। धन्यवादः।<br>● सर्वप्रथमं तु शिप्रानद्यां स्नानं कृतं पश्चात् च वयं महाकालदर्शनम् अकुर्म।<br>● आम् मित्र! गेहे सर्वं कुशलमेव।<br>● वयं गृहे न आस्म, सर्वेऽपि भ्रमणार्थं उज्जयिनीम् अगच्छाम।</td><td></td></tr>
<tr><td colspan="3">खण्डः - ग<br>अनुप्रयुक्तव्याकरणम्      20 अङ्काः</td></tr>
<tr><td>5. अ</td><td>अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत -</td><td>4×1=4</td></tr>
<tr><td></td><td>(क) आचार्याय <u>प्रियम् + धनमा</u>हृत्य प्रजतन्तुं मा व्यव्छेत्सीः।<br>(ख) <u>तनुवाग्विभवः</u> अपि सन् रघूणाम् अन्वयं वक्ष्ये।<br>(ग) एकशरीर - सङ्क्षिप्ता पृथिवी <u>रक्षितवव्येति</u>।<br>(घ) क एष मामनुत्तरन् <u>मुमूर्षुः + समायाति</u>।<br>अथवा</td><td></td></tr>
<tr><td>आ</td><td>अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत -</td><td></td></tr>
<tr><td></td><td>(क) अपेक्षया रूपवतां हि विद्या मानं लभन्तेऽतितरां जगत्याम्।<br>(ख) सन्तुष्टः + राजा मुञ्जः भोजं निजसिंहासने निवेशयेत्।<br>(ग) जाने ते अभिरुचिम् <u>अध्ययनाध्यापनयोः</u> च।<br>(घ) दैवी <u>सम्पत् + विमोक्षाय</u> निबन्धायासुरी मता।</td><td></td></tr>
<tr><td>6.</td><td>अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत -</td><td>4×1=4</td></tr>
<tr><td></td><td>(i) <u>प्रज्ञया सदृशाः आगमाः यस्य सः</u> राजा आसीत्।<br>(क) प्रज्ञसदृशागमात्   (ख) प्रज्ञासदृशागमः<br>(ग) प्रज्ञासदृशागमस्   (घ) प्रज्ञासदृशागमा<br>(ii) (<u>सवाष्पम्</u>) हा धिक्! अस्मानविज्ञायोपालभसे।<br>(क) वाष्पस्य सहितम्   (ख) वाष्पात् सहितम्<br>(ग) वाष्पेण सहितम्   (घ) वाष्पेभ्यः सहितम्<br>(iii) यदि ते <u>कर्मणि विचिकित्सा</u> स्यात्।<br>(क) कर्मविचिकित्सा   (ख) कर्मन्विचिकित्सा</td><td></td></tr>
</table>

| | | |
|---|---|---|
| | (ग) कर्माणविचिकित्सा (घ) कर्मणाविचिकित्सा<br>(iv) जनः **<u>कामं च क्रोधं च लोभं च</u>** त्यजेत्।<br>(क) कामक्रोधलोभम् (ख) कामक्रोधलोभाः<br>(ग) कामक्रोधलोभा (घ) कामक्रोधलोभान् | |
| 7. | अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितं रूपं प्रदत्त-विकल्पेभ्यः चिनुत - | 4×1=4 |
| | (i) दौवारिकः भुशुण्डीं स्कन्धे निधाय निपुणं **<u>निरीक्षमाणः</u>** असीत्।<br>(क) निर्+इक्ष् +मतुप् (ख) निर्+ईक्ष्+अण्<br>(ग) निर्+ईक्ष्+शतृ (घ) निर्+ईक्ष्+शानच्<br>(ii) निवेदितम् **<u>अप्रभु + त्व</u>**।<br>(क) अप्रभुत्व (ख) अप्रभुतम्<br>(ग) अप्रभुत्वम् (घ) अप्रभुता<br>(iii) अहं **<u>बल+मतुप्</u>** सिद्धः सुखी च अस्मि।<br>(क) बलवत् (ख) बलवान्<br>(ग) बलवति (घ) बलवता<br>(iv) आर्य! कः **<u>परित्रातव्यः</u>**।<br>(क) परि + त्राण् + तव्यत् (ख) परि + त्राण् + शानच्<br>(ग) परि + त्राण् + अनीयर् (घ) परि + त्राण् + क्तिन् | |
| 8. | समुचितं विभक्तियुक्तं पदं प्रदत्तविकल्पेभ्यः चित्वा रिक्तस्थानपूर्तिं कृत्वा लिखत - | 4×1=4 |
| | (i) ते आत्मसम्भाविताः स्तब्धाः ............. अविधिपूर्वकं यजन्ते।<br>(क) नामयज्ञेभ्यः (ख) नामयज्ञानाम्<br>(ग) नामयज्ञेषु (घ) नामयज्ञैः<br>(ii) कुलगुरुतुम्बरुमहाभागैः तु ................... अन्यदेव सूचितम्।<br>(क) गन्धर्वराजम् (ख) गन्धर्वराजाय<br>(ग) गन्धर्वराजात् (घ) गन्धर्वराजस्य<br>(iii) .................... समीपम् आगत्य दौवारिकः उवाच।<br>(क) दीपेषु (ख) दीपम्<br>(ग) दीपस्य (घ) दीपात्<br>(iv) राजा दिलीपः ................... सदृशागमः आसीत्।<br>(क) प्रज्ञायाः (ख) प्रज्ञाः<br>(ग) प्रज्ञा (घ) प्रज्ञया | |

| | | |
|---|---|---|
| 9. अ | वाच्यानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं लिखत - | 4×1=4 |
| | **राघवेन्द्रः** - भोः मानव! (i) .................. अधुना किं क्रियते?<br>**मानवः** - किं त्वम् न जानासि? सा परीक्षायै (ii) .................. करोति।<br>**राघवेन्द्रः** - तया क्रीडनाय कदा (iii) ..................?<br>**मानवः** - निश्चयेन अध्ययनं समाप्य एव (iv) .................. क्रीडनाय आगमिष्यति।<br>**मञ्जूषा**<br>आगमिष्यते, सिद्धताम्, सा, राधया।<br>**अथवा** | |
| आ | वाच्यानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयित्वा अधोलिखितानि वाक्यानि लिखत - | |
| | (i) तेन विद्यालयः .................. (गम्)।<br>(ii) .................. (युष्मद्) श्रीमद्भगवद्गीतां जानासि?<br>(iii) पिता सर्वान् .................. (पुत्र) लालयति।<br>(iv) क्रीडकैः ध्यानेन .................. (क्रीड्)। | |
| | **खण्डः - घ भागः - I**<br>**पठितांशावबोधनम् 25 अङ्काः** | |
| 10. | अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -<br>पुरा धाराराज्ये सिन्धुल-संज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वार्धक्ये भोज इति पुत्रः समजनि। सः यदा पञ्चवार्षिकस्तदा पिता ह्यात्मनो जरां ज्ञात्वा मुख्यामात्यानाहूयानुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास - यद्यहं राज्यलक्ष्मीभारधारणसमर्थं सहोदरमपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः। अथ वा बालं मे पुत्रं मुञ्जो राज्यलोभाद्विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा। पुत्रहानिर्वंशोच्छेदश्च इति विचार्य राज्यं मुञ्जाय दत्त्वा तदुत्सङ्गे भोजमात्मानं मुमोच। | 5 |
| | I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×½=1 |
| | (क) राजा कं बालं संवीक्ष्य विचारयामास?<br>(ख) पुत्रहानिर्वंशोच्छेदश्च इति विचार्य राजा राज्यं कस्मै अयच्छत्?<br>(ग) कः संज्ञः राजा चिरं प्रजाः पर्यपालयत्? | |
| | II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×1=2 |
| | (क) राजा आत्मनः जरां ज्ञात्वा किं विचारयामास?<br>(ख) राज्ञः वार्धक्ये कः समजनि?<br>(ग) सिन्धुलः किं विचार्य राज्यं मुञ्जाय अयच्छत्? | |
| | III. (अ) निर्देशानुसारम् उत्तरत - | 2×1=2 |

| | | |
|---|---|---|
| | (क) 'विचारयामास' इति क्रियापदस्य कर्तृपदं किम्?<br>(ख) 'बबन्ध' इत्यस्य विपर्ययपदं किं प्रयुक्तम्?<br>**अथवा** | |
| | **(आ) निर्देशानुसारम् उत्तरत -**<br>(क) 'सः यदा पञ्चवार्षिकस्तदा' अत्र 'सः' इति सर्वनामपदं कस्मै किं प्रयुक्तम्?<br>(ख) 'अवलोक्य' इत्यर्थे किं पदं गद्यांशे प्रयुक्तम्? | |
| 11. | **अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -**<br>**कर्णामृतं सूक्तिरसं विमुच्य, दोषेषु यत्नः सुमहान् खलानाम्।**<br>**निरीक्षते केलिवनं प्रविश्य, क्रमेलकः कण्टकजालमेव॥** | 5 |
| | **I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** | 2×½=1 |
| | (क) खलानां कीदृशः यत्नः दोषेषु भवति?<br>(ख) कः कण्टकजालं निरीक्षते?<br>(ग) खलानाम् केषु यत्नः भवति? | |
| | **II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** | 2×1=2 |
| | (क) क्रमेलकः कुत्र प्रविश्य किं निरीक्षते?<br>(ख) पद्ये सूक्तिरसं कीदृशं प्रोक्तम्?<br>(ग) किं विमुच्य खलानां यत्नः दोषेषु भवति? | |
| | **III. (अ) निर्देशानुसारम् उत्तरत -** | 2×1=2 |
| | (क) 'यत्नः' इति पदस्य विशेषणपदं किम्?<br>(ख) 'गुणेषु' इति पदस्य विलोमपदं किं प्रयुक्तम्?<br>**अथवा** | |
| | **(आ) निर्देशानुसारम् उत्तरत -**<br>(क) 'निरीक्षते' इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम्?<br>(ख) 'त्यक्त्वा' इति पदस्य पर्यायपदं किं प्रयुक्तम्? | |
| 12. | **अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत -**<br>**रामः** - अत्र मोहमुपगतस्तत्रभवान्। हन्त! निवेदितमप्रभुत्वम्। मैथिलि!<br>**मङ्गलार्थेऽनया दत्तान् वल्कलांस्तावदानय।**<br>**करोम्यन्यैर्नृपैर्धर्मं नैवाप्तं नोपपादितम्॥**<br>**सीता** - गृह्णात्वार्यपुत्रः।<br>**रामः** - मैथिलि! किं व्यवसितम्?<br>**सीता** - ननु सहधर्मचारिणी खल्वहम्।<br>**रामः** - मयैकाकिना किल गन्तव्यम्।<br>**सीता** - अतो नु खल्वनुगच्छामि। | 5 |

| | | |
|---|---|---|
| | **रामः** - वने खलु वस्तव्यम्।<br>**सीता** - तत् खलु मे प्रासादः।<br>**रामः** - श्वश्रूश्वशुरशुश्रूषापि च ते निर्वर्तयितव्या।<br>**सीता** - एनामुद्दिश्य देवतानां प्रणामः क्रियते। | |
| | I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×½=1 |
| | (क) रामः सीतां कान् आनेतुं कथयति?<br>(ख) सहधर्मचारिणी का अस्ति?<br>(ग) एकाकिना केन गन्तव्यम्? | |
| | II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×1=2 |
| | (क) रामेण कुत्र वस्तव्यम्?<br>(ख) सीता किं निमित्तं देवतानां प्रणामं करोति?<br>(ग) कः मोहं उपगतः? | |
| | III. (अ) निर्देशानुसारम् उत्तरत - | 2×1=2 |
| | (क) 'तत् खलु मे प्रासादः।' इत्यत्र 'मे' इति सर्वनामपदं कस्मै प्रयुक्तम्?<br>(ख) 'करोमि' इति क्रियापदस्य कर्तृपदं किम्?<br>**अथवा** | |
| | (आ) निर्देशानुसारम् उत्तरत -<br>(क) 'दानवानाम्' इति पदस्य किं विलोमपदं नाट्यांशे प्रयुक्तम्?<br>(ख) 'मैथिली' इति पदं कस्याः पर्यायः अस्ति? | |
| 13.अ | अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत - | 3×1=3 |
| | **तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।**<br>**दिलीप इव राजेन्दुरिन्दुः क्षीरनिधाविव॥**<br>**भावार्थः** - येन प्रकारेण (i) ........... चन्द्रमा उत्पन्नः अभवत् तथा एव तस्य (ii) ......... वंशे तस्य अपेक्षया अपि (iii) .................. निर्मलतरः राजसु चन्द्रः इव तेजस्वी राजा दिलीपः अभवत् (जन्म लब्धवान्) ।<br>**मञ्जूषा**<br>वैवस्वतमनोः, कान्तिमान्, क्षीरसागरात्।<br>**अथवा** | |
| आ | प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत - | |

| | | |
|---|---|---|
| | **(i) सूक्तिरसं विमुच्य दोषेषु यत्नः सुमहान् खलानाम्।**<br>(क) खलः नरः दुष्टताम् आचरति।<br>(ख) दुष्टानां प्रयासः सुवचनं त्यक्त्वा दोषेषु/व्यसनेषु भवति।<br>(ग) सज्जनानां सुवचनं त्याज्यं भवति।<br>**(ii) युधिष्ठिरस्य एषा एव चिन्तनसरणिः।**<br>(क) ज्येष्ठपाण्डुपुत्रस्य ईदृशी एव विचारधारा।<br>(ख) तस्य ईदृशी प्रवृत्ति न आसीत्।<br>(ग) युधिष्ठिरस्य कुलपरम्परा ईदृशी एव।<br>**(iii) यान्यनवद्यानि कर्माणि तानि सेवितव्यानि।**<br>(क) यानि वन्दनीयानि तानि सेवा योग्यानि।<br>(ख) सेवा एव करणीयानि।<br>(ग) यानि दोषरहितानि अनिन्द्यानि च कार्याणि सन्ति तानि करणीयानि। | |
| 14. | अधोलिखित-श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानपूर्तिं कुरुत - | 3×1=3 |
| | **वनगमननिवृत्तिः पार्थिवस्यैव तावत्**<br>**मम पितृपरवत्ता बालभावः स एव।**<br>**नवनृपतिविमर्शे नास्ति शङ्का प्रजानाम्**<br>**अथ च न परिभोगैर्वञ्चिता भ्रातरो मे॥**<br>**अन्वयः** - तावत् एव (i) ......... वनगमन-निवृत्तिः, मम पितृपरवत्ता सः एव (ii) ............, नवनृपति-विमर्शे प्रजानां शङ्का न अस्ति, अथ च मे भ्रातरः (iii) ........... वञ्चिताः न (भविष्यन्ति)।<br>**मञ्जूषा**<br>बालभावः, परिभोगैः, पार्थिवस्य। | |
| 15.अ | 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत - | 4×1=4 |
| | **'क' स्तम्भः** / **'ख' स्तम्भः**<br>(1) प्रजानामेव भूत्यर्थम् — (क) अन्तेवासिनमनुशास्ति।<br>(2) वेदम् अनूच्याचार्यः — (ख) स ताभ्यो बलिमग्रहीत्।<br>(3) अजीर्णे भेषजं वारि — (ग) शिष्येभ्यः जीवनकलां शिक्षयिष्यामि।<br>(4) आचार्येतिपादं प्राप्य — (घ) जीर्णे वारि बलप्रदम्।<br>**अथवा** | |

| आ | अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चित्वा लिखत - | |
|---|---|---|
| | (क) <u>**भूत्यै**</u> न प्रमदितव्यम्।<br>(ख) फले कस्मिन् <u>**स्पृहा**</u> तस्या येनाकार्यं करिष्यति।<br>(ग) राजा ब्राह्मणं सम्प्रेष्य <u>**निशीथे**</u> शयनमासाद्य व्यचिन्तयत्।<br>(घ) केलिवनं प्रविश्य <u>**क्रमेलकः**</u> कण्टकजालं निरीक्षते।<br>**मञ्जूषा**<br>कामना, ऐश्वर्याय, उष्ट्रः, रात्रौ। | |

**खण्डः - घ भागः - II**

**सामान्यसंस्कृतसाहित्यपरिचयः 10 अङ्काः**

| 16. | अधोलिखित-प्रश्नानाम् उत्तराणि लिखत - (केवलं प्रश्नत्रयम्) | 3×1=3 |
|---|---|---|
| | (i) 'शिक्षावल्याः' कः पाठः सङ्कलितः?<br>(ii) 'प्रजानुरञ्जको नृपः' इति पाठः कस्मात् महाकाव्यात् सङ्कलितः?<br>(iii) 'शिवराजविजयः' इत्यस्य उपन्यासस्य लेखकः कः?<br>(iv) 'कार्याकार्यव्यवस्थितिः' इत्यस्य पाठस्य सन्दर्भग्रन्थः कः? | |
| 17. | मञ्जूषायाः समुचितं पदं चित्वा रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्) | 3×1=3 |
| | (i) कालिदासेन रचितं खण्डकाव्यम् ............... अस्ति।<br>(ii) .................. दमयन्तीकथा अपि कथ्यते।<br>(iii) .................. सन्दर्भे 'गद्यं कवीनां निकषं वदन्ति' इति उक्तिः प्रसिद्धा।<br>(iv) दैवीयोदात्तगुणोपेतः उच्चकुलीयः क्षत्रियः .................. नायकः भवति।<br>**मञ्जूषा**<br>नलचम्पू, महाकाव्यस्य, मेघदूतम्, गद्यरचनायाः। | |
| 18. | समुचितं मेलयित्वा लिखत - | 4×1=4 |
| | **भागः - क** / **भागः - ख**<br>(i) मृच्छकटिकम् — (क) मुद्राराक्षसम्<br>(ii) राजनैतिकनाटकम् — (ख) शूद्रकः<br>(iii) महाभारताधारितम् — (ग) कालिदासः<br>(iv) मालविाग्निमित्रम् — (घ) वेणीसंहारः | |

***************************************